# ४ आदिवासी, दीकुः, एकस्य स्वर्णयुगस्य परिकल्पना च

पञ्चाशीत्यधिकाष्टा-दश-शत-तमे वर्षे (1885) बिरसानामधेयः कश्चित् जनः झारखण्डे छोटानागपुरस्य वनेषु ग्रामेषु च परिभ्रमन् दृष्टः । जनाः कथयन्ति स्म यत् तस्य समीपे अलौकिक्यः शक्तयः सन्ति इति - सः सर्वान् रोगान् अपाकर्तुं शक्नोति लघुचयं च पि अनेक-गुणितं कर्तुं शक्नोति । बिरसा-महोदयः स्वयम् अघोषयत् – यत् अहं जन-रक्षार्थं तान् बाह्यजनेभ्यः (दीकुजनेभ्यः) च मोचयितुम् ईश्वरेण प्रेषितः अस्मि । किञ्चित्-कालानन्तरं सहस्राधिकाः जनाः बिरसाम् अनुगन्तुम् आरब्धवन्तः । ते तम् ईश्वरं मन्यन्ते स्म । जनाः तस्मिन् विश्वसन्ति स्म यत् बिरसामहोदयः तेषां समस्यानां समाधानाय आगतवान् इति ।

बिरसा-महोदयस्य जन्म एकस्मिन् मुण्डा-परिवारे अभवत् । "मुण्डा-समुदायः" इति कश्चित् जनजातीय-समुदायः अस्ति - यः छोटा-नागपुर इति स्थाने निवसति । बिरसा-महोदयस्य समर्थकेषु तस्य क्षेत्रस्य अन्ये आदिवासिनः संथाल-उरांबादयः अपि सम्मिलिताः । एते सर्वे अपि आदिवासिनः स्वपरिवेशे आगतैः परिवर्तनैः आङ्ग्ल-शासनस्य च कारणात् उत्पद्यमानाभिः समस्याभिः च अवसाद-ग्रस्ताः आसन् । आदिवासिनां पारम्परिक-जीवन-पद्धतिः नश्यन्ती दृश्यते स्म, तेषाम् आजीविका नष्टप्राया धार्मिक-व्यवस्था च ह्रास-पथे आसीत् ।

**चित्रम्-१** उडीसायाः डोङ्गरिया-कन्ध-समुदायस्य महिलाः नदीमार्गेण विपणिं गच्छन्ति ।

बिरसा-महोदयः कासां समस्यानां समाधानं कर्तुम् इच्छति स्म ? ये "दीकू" इति उच्यन्ते स्म, ते बाह्याः जनाः के आसन् ? तैः बाह्यजनैः कथं क्षेत्रीयजनाः क्रीतदासाः कृताः आसन् ? आङ्ग्लीयानां शासने आदिवासिभिः सह कीदृशः व्यवहारः क्रियते स्म ? आदिवासिनां जीवनं कथं परिवर्तते स्म ? एतस्मिन् अध्याये वयम् एतादृशानाम् एव केषाञ्चित् प्रश्नानां विषये विचारं करिष्यामः ।



गतवर्षे भवद्भिः आदिवासि-समुदायस्य विषये पठितम् । प्रायः समुदायस्य (कबीला) रीतयः परम्पराः च ब्राह्मणैः निर्दिष्ट-रीतिभ्यः अतीव पृथक् आसन् । एतेषु समाजेषु एतादृश्यः गहनाः सामाजिक-भिन्नताः अपि न आसन् याः वर्णे आधारितेषु समाजेषु दृश्यन्ते । सर्वे जनाः समुदायस्य नियमाधीनाः आसन् । परन्तु एतस्य अयम् अभिप्रायः अपि नास्ति यत् आदिवासिनां मध्ये कश्चित् आर्थिकः सामाजिकः च भेदः न आसीत् एव ।

## जनजातीयसमूहाः कथं जीवन्ति स्म ?

एकोन-विंशति-शताब्दं यावत् देशस्य विभिन्नभागेषु आदिवासिनः विभिन्नेषु गतिविधिषु सक्रियाः आसन्।

### केचन झूमकृषिं कुर्वन्ति स्म -

आदिवासि-समुदायेषु केचन समुदायाः झूमकृषिं कुर्वन्ति स्म, झूमकृषिः "यायावरीयकृषिः" भवति। एतादृशं कृषिकार्यम् अधिकांशतः प्रायः वनस्थेषु लघु-भूखण्डेषु क्रियते स्म। झूम-कृषकाः भूमिं यावत् आतपम् आनेतुं वृक्षाणाम् उपरितनं भागं कर्तित्वा भूमौ उत्पन्नानि अनावश्यकानि तृणादिकानि प्रज्वाल्य स्वच्छीकुर्वन्ति स्म। तदनन्तरं ते तृणावशिष्ट-भस्म रिक्त-भूमौ विकिरन्ति स्म। अस्मिन् भस्मनि "पोटाश" इति पदार्थः (द्रव्यं) भवति स्म, तस्मात् मृत्तिका ऊर्वरा भवति स्म। ते परशुना वृक्षान् कृन्तन्ति स्म, खनित्रेण च भूमेः उपरितलं (सतह) खनन्ति स्म। झूम-कृषकाः केवलं बीज-वपनं कुर्वन्ति स्म, भूमिं वृषभहलादिभिः च न कर्षन्ति स्म। यदा एकदा सस्यं पचति स्म तदा ते तत् कर्तित्वा अपरं स्थानं गच्छन्ति स्म। यस्यां भूमौ तैः सद्य एव सस्यं कर्तितं भवति स्म सा भूमिः अनेकानि वर्षाणि यावत् "अकृष्टपच्या" इति रूपेण तिष्ठति स्म।

**अकृष्टपच्या भूमिः - (परती )** - भूमेः उर्वरा-शक्तिं वर्धयितुं स्वल्पकालाय सस्यस्य उत्पादनेन विना एव भूमिः रिक्ता स्थाप्यते स्म तदा सा "अकृष्टपच्या" (परती) इति शब्देन कथ्यते स्म।

**सालवृक्षः (साल)** - कश्चित् वृक्षविशेषः।

**मधुद्रुमः (महुआ)** इति - कश्चित् पुष्पविशेषः यः भक्ष्यते अथवा मदिरां निर्मातुं प्रयुज्यते।

यायावरीय-कृषकाः मुख्यरूपेण पूर्वोत्तरस्य मध्यभारतस्य च पर्वतीयासु वन्योपत्याकासु एव निवसन्ति स्म। एतेषाम् आदिवासि-समुदायस्थानां जनानां जीवनं वनेषु अबाध-गत्या भ्रमण-पुरःसरं चलति स्म, एते च सस्यानि उत्पादयितुं भूमेः वनानां च प्रयोगं कुर्वन्ति स्म। आदिवासि-सामुदायिकाः जनाः यायावर-प्रवृत्त्या एव कृषिकार्यं कर्तुं शक्नुवन्ति स्म।

### केचन आखेटकाः संग्राहकाः च आसन्

अनेकेषु क्षेत्रेषु आदिवासि-समूहाः पशूनाम् आखेटं कृत्वा तथा च वन्योत्पादान् संगृह्य स्वकार्यं साधयन्ति स्म। ते तेषां जीवनाय वनानि नितान्तम् आवश्यकानि इति मन्यन्ते स्म। उत्कल-प्रान्तस्य वनेषु खोण्डनामकः समुदायः एतादृशः एव कश्चित् समुदायः आसीत्। एतस्य समुदायस्य जनाः परस्परं सङ्घीभूय आखेटं कुर्वन्ति स्म आखेटद्वारा यत् किमपि प्राप्यते स्म परस्परं तत् वण्टयन्ति स्म। ते वन्यफल-मूलानि खादन्ति स्म। ते सालवृक्षस्य मधुद्रुमस्य च बीजेभ्यः तैलं निष्कासयन्ति स्म तस्य च प्रयोगं कुर्वन्ति स्म। ते चिकित्सार्थम् अनेकानि वन्यानि औषधानि प्रयुञ्जते स्म तथा च अनेकानि वन्यानि वस्तूनि संगृह्य स्थानीय-महाहट्टेषु अपि विक्रीणन्ते स्म। यदा स्थानीयाः तन्तुवायाः चर्मकाराः च वस्त्रस्य चर्मणः च रङ्गनाय रङ्गस्य आवश्यकताम् अनुभवन्ति स्म तदर्थं च यदा कुसुमस्य पलाशस्य च पुष्पाणि आवश्यकानि भवन्ति स्म तदा ते तन्तुवायाः चर्मकाराः च खोण्डसमुदायस्य जनान् कथयन्ति स्म यत् ते एतानि वस्तूनि आनीय तेभ्यः दद्युः इति।

**चित्रम् -२** - डोङ्गरिया-कन्ध-कुटुम्बस्य महिलाः पण्डानुवृक्षस्य पत्राणि एकत्रीकृत्य नयन्ति। एतैः पत्रैः पर्ण-पात्राणि निर्मीयन्ते।



एते समुदायाः तण्डुलान् अन्यानि अन्नानि च कुतः प्राप्नुवन्ति स्म ? बहुधा तु वस्तुविनिमयेन कार्यं साधयन्ति स्म । ते स्वबहुमूल्यानां वन्योत्पादानां विनिमयेन निजावश्यकतानुगुणं वस्तुनि स्वीकुर्वन्ति स्म । कदाचित् तैः आवश्यकवस्तूनि क्रेतुं स्वस्य स्वल्पायस्य अपि आश्रयः स्वीकरणीयः भवति स्म । तेषु अनेके जनाः पार्श्वस्थेषु ग्रामेषु सेवाकार्यं कुर्वन्ति स्म । कश्चित् भारं वहति स्म अपि च कश्चित् राजमार्गाणां निर्माणकार्येषु सेवाकार्यं करोति स्म । अनेके आदिवासिनः क्षेत्रश्रमिकाः आसन् । यदा वन्योत्पादाः न्यूनाः भवन्ति स्म तदा तैः कष्टेन वृत्तिः प्राप्यते स्म । परन्तु तेषु अनेके समुदायाः यथा मध्यभारतस्य बैगासमुदायः - श्रमिकरूपेण कार्यं कर्तुं न इच्छति स्म । बैगा-समुदायस्य जनाः आत्मानं वनस्य सन्तत्तिरूपेण मन्यन्ते स्म अतः ते वन्योत्पादैः एव जीवितुं शक्नुवन्ति । श्रमिकरूपेण कार्यकरणं बैगाजनानां कृते अपमानपूर्णम् आसीत् ।




**चित्रम् ३** – भारते कानिचन आदिवासिक्षेत्राणि

यानि वस्तूनि पार्श्वस्थेषु क्षेत्रेषु न उत्पद्यन्ते स्म तानि वस्तूनि प्राप्तुम् आदिवासिनः क्रयणं विक्रयणं चापि कुर्वन्ति स्म । एतैः कारणैः कदाचित् आदिवासिनः वणिजां महाजनानां च उपरि आश्रिताः भवन्ति स्म । वणिजः विक्रयणार्थं वस्तूनि आनीय आयन्ति स्म अपि च अधिकमूल्येन वस्तूनि विक्रीणन्ते स्म । उत्तमर्णाः(सूदखोर) महाजनाः अपि आदिवासिनां कृते ऋणं तु यच्छन्ति स्म परन्तु तस्य कुसीदः अधिकः भवति स्म । इत्थम् अव्यवस्थित-पण-व्यवहारेण वाणिज्यप्रक्रियया च आदिवासिनः नितान्तम् अधर्मणाः निर्धनाः च जाताः । परिणामतः, आदिवासिनः महाजनाः वणिजः च बहिष्ठात् आगताः क्रूराः जनाः सन्ति ते एव अस्माकं सर्वासां समस्यानां कारणभूताः सन्ति इति दृष्ट्या आदिवासिनः तान् पश्यन्ति स्म ।

## केचन पशून् पालयन्ति स्म -

अनेके आदिवासिसमूहाः पशून् पालयित्वा स्वजीवनस्य निर्वहणं कुर्वन्ति स्म । पशुचारकाः ऋतोः अनुसारं पशून् (अजमेषादियूथं) (रेबड इति एतम्) इतस्ततः नीत्वा गच्छन्ति स्म । यदा एकस्य स्थानस्य घासादिकं समाप्तिं याति स्म तदा ते अपरं क्षेत्रं प्रति गच्छन्ति स्म । पञ्चनद-प्रान्तस्य पर्वतीयक्षेत्राणां वन्यगुर्जराः आन्ध्रप्रदेशस्य च लबाडियादि-समुदायस्य जनाः गो-महिष्यादिपशून् पालयन्ति स्म । हिमाचलप्रदेशस्य कुल्लूजनपदस्य गद्दीसमुदायस्य जनाः अजमेषपालकाः आसन् काश्मीरस्य च बकरबाल-समुदायस्य जनाः अजाः पालयन्ति स्म । अग्रिमवर्षे भवन्तः इतिहासस्य पाठ्यपुस्तके एतेषां विषये विस्तरेण पठिष्यन्ति ।

## आखेटस्य, बीज-वपनस्य,नूतनक्षेत्रस्य च गमन-कालः

किं भवद्भिः कदाचित् एतस्मिन् विषये अवधानं कृतं यत् विविध-सामाजिकानां कार्याणि कार्यकरणसमयः कार्यविषयिणी च अवधारणा समाना न भवति ? विभिन्न-क्षेत्रेषु परिभ्रमणशीलादिवासिनाम् आखेटकानां च जीवनं विशिष्टप्रकारेण पुरुष-महिला-गतेन च कार्यविभाजनेन चलति स्म।

ब्रिटिश-मानव-विज्ञानी वेरियर-ऐल्विनः त्रिंशदधिकैकोनविंशतिशत-चत्वारिंशदधिकैकोनविंशतिशततमदशकयोः (1930-1940) अनेकानि वर्षाणि यावत् मध्यभारतस्य बैगा-खोण्ड-समुदाययोर्मध्ये यापितानि आसन्। ऐल्विन-द्वारा-लिखितान् निम्नलिखितांशान् पठित्वा वयम् एतं समयक्रमं कार्यविभाजनं चापि अवगन्तुं शक्नुमः। सः लिखति –

> चैत्रमासे महिलाः ---एकत्रीकरणाय अपि च अवशिष्टस्थाणून् कर्तयितुं च गच्छन्ति स्म। पुरुषाः विशालान् वृक्षान् कर्तयन्ति स्म आखेटाय च गच्छन्ति स्म। आखेटः पूर्णिमायाः पूर्वकालात् आरभते स्म। आखेटाय वंशपाशानां प्रयोगं कुर्वन्ति स्म। महिलाः सागो इत्यस्य तिन्तिड्याः कवकादिकस्य च फलानि संगृह्य आनयन्ति स्म। बैगा-महिलाः केवलं कन्दमूलानि संगृह्णन्ति अथवा मधुद्रुमस्य बीजानि एकत्रीकुर्वन्ति। मध्यभारतस्य वैगावासिनः उत्तमाः आखेटकाः इति मन्यन्ते स्म---। वैशाखे वनानि प्रज्वाल्यन्ते स्म। महिलाः अर्धज्वलितानि काष्ठानि ईन्धनाय चिन्तवन्ति स्म। पुरुषाः आखेटाय निरन्तरं गच्छन्ति स्म परन्तु ग्रामाद् दूरं न गच्छन्ति स्म। ज्येष्ठमासे बीजवपनं भवति स्म आखेटः च चलति स्म। आषाढमासतः भाद्रपदमासं यावत् पुरुषाः क्षेत्रेषु कार्यं कुर्वन्ति स्म। आश्विनमासे बीजकोशाः बीजपुटानि च जायन्ते स्म। तथा च कार्तिकमासे च कुटकी इत्यस्य पचनं भवति स्म। मार्गशीर्षमासे सर्वाणि सस्यानि पचन्ति स्म तथा च पौषमासे बुशनिष्कासनम् (फटकन) अथवा परिशोधनं च क्रियते स्म। नृत्यगानादिकं विवाहाः चापि पौषमासे एव भवन्ति स्म। माघमासे पुरुषाः नूतन-यायावरीय-कृषिं कर्तुम् अन्यत् स्थानं गच्छन्ति स्म। एतस्मिन् काले आखेटः वस्तूनां सङ्ग्रहः एव जीवनस्य मुख्यसाधनं भवति स्म।
>
> एतत् चक्रं प्रथमवर्षीयं भवति स्म। द्वितीयस्मिन् वर्षे आखेटाय अधिकः कालः लभ्यते स्म यतो हि केवलं केषाञ्चित् एव सस्यानां बीजवपनं कर्तनं च भवति स्म। यतो हि भोजनं च तत्र तस्मिन् काले पर्याप्तं भवति स्म अतः पुरुषाः यायावरीयं जीवनमेव जीवन्ति स्म। तृतीये वर्षे भोजनाय वन्योत्पादानाम् अपि आवश्यकता अनुभूयते स्म।

वेरियर-ऐल्विनद्वारा लिखितस्य बैगा एल्विन इत्येतयोः अप्रकाशितरचनायाः "नोट्स- आन- द-खोण्ड्स"(वेरियर-ऐल्विन-पेपर्स,नेहरु-स्मृति-संग्रहालयः पुस्तकालयः च) इत्यस्याः उपरि आधारितसूचना इयं विद्यते।



**चित्रम् - ४** – ईन्धनाय कष्ठानि नयन्ती काचित् संथालबालिका, बिहारः, षट्चत्वारिंशदधिकैकोनविंशतिशततमवर्षम्, (1946)।

बालाः वने जातस्य उत्पादनस्य एकत्रीकरणाय स्वमातृभिः सह वनं गच्छन्ति।

### ➢ गतिविधिः

बैगा-समुदायस्य महिलाः पुरुषाः च यानि कार्याणि कुर्वन्ति तानि सावधानं पठन्तु। किं भवन्तः अत्र कमपि क्रमं पश्यन्ति ? तेषां जनानां कार्येषु कः भेदः आसीत् ?

## केचन जनाः एकस्मिन् स्थाने एव कृषिकार्यं कुर्वन्ति स्म

एकोनविंशतिशताब्दात् पूर्वमेव अनेके जनजातीयाः कुटुम्बाः एकस्मिन् स्थाने एव स्थित्वा कृषिं कुर्वन्ति स्म। ते बहुधा स्थानस्य परिवर्तनम् अकृत्वा प्रतिवर्षम् एकस्मिन् एव स्थाने कृषिं कुर्वन्ति स्म। ते कृषिकार्याय हलानां प्रयोगम् आरब्धवन्तः अपि च शनैः शनैः ते भूम्यधिकारान् अपि प्राप्नुवन्ति स्म। अनेकेषु समुदायेषु छोटानागपुरस्य मुण्डाजनजातीयानां जनानाम् इव भूमिः सम्पूर्णस्य कुटुम्बस्य सम्पत्तिः भवति स्म। वंशस्य सर्वे सदस्याः तेषां मूलनिवासिनां वंशजाः इति मन्यन्ते स्म, यैः सर्वादौ तत्र आगत्य भूमेः सिद्धता अर्थात् स्वच्छता कृता। परिणामतः भूमौ सर्वेषाम् अधिकारः समानरूपेण भवति स्म। पुनरपि, प्रायः एवं भवति स्म यत् कुलस्य केचन जनाः अन्येभ्यः अधिकाः शक्तिसम्पन्नाः भवन्ति स्म। केचन प्रमुखत्वेन जायन्ते स्म अन्ये च तेषाम् अनुयायिनः भवन्ति स्म। ये शक्तिशालिनः भवन्ति स्म ते स्वयं कृषिकार्यं न कुर्वन्ति स्म अपितु प्रायः स्वभूमेः कर्षणं ते राशिभागप्रक्रियाद्वारा(बटाई) अन्यैः कारयन्ति स्म।

ब्रिटिशाधिकारिणः गोण्ड-संथालसदृशान् स्थायिरूपेण एकस्मिन् स्थाने वास्तव्यादिवासि-समूहान् आखेटकसंग्राहकाणां यायावरीय-कृषक-समूहानां च अपेक्षया अधिकसभ्यान् मन्यन्ते स्म। वने भवाः वन्याः तथा च ते क्रूराः इति मन्यन्ते स्म। आङ्ग्लीयाः ऊहन्ते स्म यत् वन्यजनानां स्थायिरूपेण एकस्मिन् स्थाने एव तेषां वासः कारणीयः अपि च ते अपि सभ्याः करणीयाः इति आवश्यककार्यमस्ति।

**यायावरीयाः कृषकाः (बेवड इति)** - मध्यप्रदेशे यायावरीयकृष्यर्थं प्रयुज्यमानः शब्दः।

## औपनिवेशैकेन शासनेन आदिवासिनां जीवने के प्रभावाः जाताः ?

ब्रिटिशशासस्य काले आदिवासिसमूहानां जीवनं परिवर्तितम्। आगच्छन्तु पश्यामः यत् एतानि परिवर्तनानि कानि आसन्।

## आदिवासिप्रमुखानां किम् अभवत् ?

आङ्ग्लीयानाम् आगमनात् प्राक् अनेकेषु क्षेत्रेषु आदिवासि-प्रमुखाणां महत्त्वपूर्णस्थानं भवति स्म। तेषां पार्श्वे अन्येषाम् अपेक्षया अधिका शक्तिः भवति स्म तथा च ते स्वक्षेत्रे नियन्त्रणं स्थापयति स्म। अनेकेषु स्थानेषु तेषां स्वकीयम् आरक्षिदलं भवति स्म तथा च ते भूमेः वन्यप्रबन्धस्य च स्थानीयनियमान् स्वयं निर्मान्ति स्म। ब्रिटिशशासनस्य अन्तर्गतम् आदिवासिप्रमुखाणां कार्याणि अधिकाराः च आधिक्येन परिवर्तितानि आसन्। ते केषुचित् ग्रामेषु तु भूमेः स्वामित्वं प्राप्तवन्तः परन्तु तेषां शासकीयाः शक्तयः तेभ्यः परिहृतानि तथा च ते ब्रिटिशाधिकारिभिः निर्मितान् नियमान् पालयितुं बाध्याः कृताः। तैः आङ्ग्लीयैः राजस्वं दातव्यं भवति स्म अपि च आङ्ग्लप्रतिनिधिरूपेण स्वसमूहानाम् उपरि अनुशासनं स्थापनीयं भवति स्म। पूर्वं तेषां पार्श्वे या शक्तिः आसीत् अधुना सा तेषां समीपे नासीत्, ते परम्परागतानि कार्याणि अधुना न कर्तुं शक्नुवन्ति स्म।



**चित्रम्- ५** पूर्वोत्तरस्य निशि-आदिवासिनाम् एकस्मिन् ग्रामे (यूपैः) तरुस्कन्ध-निर्मितगृहम्।

यदा एतानि गृहाणि निर्मीयन्ते तदा सम्पूर्णग्रामः साहाय्यं करोति।

## यायावरशिल्पकाराणां किम् अभवत् ?

ये समूहाः इतस्ततः भ्रमन्ति स्म एकस्मिन् स्थाने स्थायित्वेन न तिष्ठन्ति स्म एतादृशैः समूहैः आङ्ग्लीयाः आत्मानं समस्यग्रस्ताः वयम् इति मन्यते स्म। आङ्ग्लीयाः इच्छन्ति स्म यत् आदिवासिनः एकस्मिन् स्थाने स्थायिरूपेण उषित्वा कृषिकार्यं कुर्वन्तु इति।



**चित्रम् -६-** गुर्जरप्रान्तस्य कस्मिंश्चित् जङ्गले कृषिं कुर्वत्यः भील-महिलाः।

यायावरीय-कृषिः गुर्जरप्रान्तस्य अनेकेषु वनक्षेत्रेषु अधुना अपि भवति। भवन्तः द्रष्टुं शक्नुवन्ति यत् अत्र वृक्षाः कर्तिताः, तथा च कृष्यर्थं भूमेः सिद्धता अपि कृता अस्ति।

स्थायिकृषकाणां नियन्त्रणं सरलम् आसीत्। आङ्ग्लीयाः स्वशासनाय आयस्य नियमितस्रोतः अपि इच्छन्ति स्म। परिणामतः ते भूमि-विषयकान् काञ्चान् अधिनियमान् क्रियान्वयितान् अकुर्वन्। ते भूमिं मापयित्वा प्रत्येकं जनस्य सहभागितां सुनिश्चितवन्तः। तैः एतदपि निश्चितं यत् कस्मात् जनात् कियत् राजस्वं स्वीकरणीयं स्यात्। केचन कृषकाः भूस्वामिनः सन्ति अपि च केचन निरूपितमूल्यवन्तः अथवा (पट्टेदार) इति पदवाच्याः भविष्यन्ति इति तैः घोषितम्। यथा भवन्तः पूर्वं द्वितीयाध्याये दृष्टवन्तः। निरूपितभूमिकाः (पट्टेदार) स्वभूस्वामिभ्यः शुल्कं यच्छन्ति स्म भूस्वामिनः च सर्वकाराय राजस्वं यच्छन्ति स्म।

झूमकृषकाः स्थायित्वेन कृषिकार्यं कुर्युः इति तदर्थम् आङ्ग्लीयैः कृतप्रयासः अधिकः सफलः न अभवत्। यत्र जलं न्यूनं स्यात् भूमिः च शुष्का भवेत् तत्र हलैः कृषिकार्यं सरलं न भवति। अपितु हलानां साहाय्येन ये कृषकाः कृषिं कुर्वन्ति तेषां हानिरेव अभवत्, यतो हि तेषां क्षेत्रेषु समीचीनम् उत्पादनं न भवति स्म। अतः पूर्वोत्तर-राज्यानां झूमकृषकाः परम्परागत-रूपेण एव जीविष्यामः इति विषये ते आग्रहवन्तः आसन्। व्यापक-विरोधस्य पश्चात् आङ्ग्लीयैः तेषाम् अभ्यर्थना स्वीकृता अपि च एतादृशेभ्यः कुटुम्बेभ्यः वन्यस्य केषु भागेषु कृषिं कर्तुम् अनुमतिं दत्तवन्तः।

## वन्याधिनियमाः तेषां प्रभावः च

यथा भवद्भिः दृष्टम्, आदिवासि-समुदायस्य जीवनं वनसम्बद्धम् आसीत्, अतः वन्याधिनियमेषु जातानां परिवर्तनानां कारणात् आदिवासिनां जीवने अपि अतीवः प्रभावः जातः।



*__चित्रम्__- आन्ध्रप्रदेशे धान्यकृषिक्षेत्रे कार्यं कुर्वन्तः आदिवासिनः।*

*समतल-क्षेत्रेषु वनेषु धान्यस्य कृष्यान्भ्यन्तरे परिवर्तनं पश्यतु।*

आङ्ग्लीयैः सम्पूर्णेषु वनेषु स्वनियन्त्रणं स्थापितम् आसीत्, वनानि राज्यस्य सम्पत्ति-रूपाणि सन्ति इति तैः घोषितम् आसीत्। कानिचन वनानि आरक्षितानि सन्ति इति तानि घोषितानि आसन्। एतानि एतादृशानि वनानि आसन् यत्र आङ्ग्लीयानाम् आवश्यकतापूर्तये भवनीयकाष्ठानि उत्पद्यन्ते स्म। एतेषु वनेषु जनानां स्वतन्त्ररूपेण भ्रमणस्य झूमकृषेः फलसंग्रहणस्य पशूनाम् आखेटस्य च अधिकारः नासीत्। एतस्याम् अवस्थायां झूमकृषकाः कथं जीवितुं शक्नुवन्ति स्म ? अतः, तेषु कार्यस्य प्राप्तेः बाध्यतावशात् कार्यस्य अन्वेषणाय वा अन्येषु क्षेत्रेषु गन्तुं बाध्याः जाताः।

यदा आङ्ग्लीयैः वनेषु आदिवासिनः न वसितुम् अर्हन्ति इति अधिसूचना दत्ता अर्थात् प्रतिबन्धः च तत्र स्थापितः तदा तेषां पुरतः काचित् समस्या उत्पन्ना। समस्या इयम् आसीत् यत् रेलवे-पथाधाराय (स्लीपर्स इत्यस्मै ) वृक्षाणां कर्तॄणां व्यवस्था कुतः स्यात् अपि च इतस्ततः वृक्षान् नेतुम् अपि श्रमिकानां प्रबन्धः कुतः स्याद् इति ?

**काष्ठस्थूणा- काण्डानि ( स्लीपर) -** काष्ठस्य ऋजु-पट्टिकाः येषाम् उपरि रेलयानस्य (पटरिया) अर्थात् मार्गे आच्छाद्यन्ते।

औपनिवेशिकैः अधिकारिभिः एतस्याः समस्यायाः अपि समाधानम् अन्विष्टम्। तैः निश्चितं यत् झूम-कृषकेभ्यः वनेषु भूमेः लघुखण्डाः दास्यन्ते अपि च ते तत्र कृषिं कर्तुम् अपि अधिकृताः भविष्यन्ति परन्तु प्रतिभूतिः इयम् अस्ति यत् ये ग्रामीणाः सन्ति तैः वनविभागाय श्रमदानं करणीयं भविष्यति, वनानां च संरक्षणं करणीयं भविष्यति। अनेन प्रकारेण अनेकेषु क्षेत्रेषु वनविभागेन अनार्घ-श्रमस्य आवश्यकतायाः आपूर्तये वनेषु ग्रामाः स्थापिताः।

**स्रोतः -२**

### "आङ्ग्लीयानाम् अस्मिन् देशे जीवनं कठिनम् अस्ति"

त्रिंशदधिकैकोन-विंशति-शत-तम-दशके (1930) वेरियर-ऐल्विनः मध्यभारते स्थितानाम् बैगा-आदिवासिनां क्षेत्राणां भ्रमणं कृतवान्। ऐल्विनः एतेषां जनानां रीतीनां कलानां लोकसंस्कृतेः च विषये जिज्ञासते स्म। तेन वैगा-समुदायस्य जनानाम् अनेकानि गीतानि सङ्गृहीतानि येषु एतस्मिन् विषये दूषणम् आसीत् यत् आङ्ग्लीयानां शासने बैगासमुदायिनः कीदृश्यां दुर्दशायां सन्ति इति।

एतस्मिन् आङ्ग्ल-शासिते देशे जीवनं कियत् कठिनम् अस्ति -
जीवनं कियत् कठिनम्,
भूस्वामी ग्रामे उपविष्टः,
उद्यानेषु ग्राम-भू-लेखकः
क्षेत्रेषु सर्वकारः
आङ्ग्ल-शासिते एतस्मिन् देशे जीवनं कियत् कठिनम् अस्ति
पशुकरं दातुं गोः विक्रयणं क्रियते,
वनकरं दातुं च महिषी विक्रीयते,
वृषभान् विक्रीय राजस्वं दीयते,
भोजनं कुतः प्राप्नुमः
आङ्ग्लशासिते अस्मिन् देशे

वेरियर-ऐल्विनः तथा च शामराव-हिवालेवर्यः,सांग्स-आफ-दि-मैकल,पृष्ठम् – (षोडशाधिकैकशतम् (316) इत्यस्मात् उद्धृतम् अस्ति।



**चित्रम्-८** – गोदारा-महिलाः वयन्त्यः सन्ति।

अनेकैः आदिवासि-समुदायस्य जनैः औपनिवेशिक-वनाधिनियमानां विरोधः कृतः। तैः उक्तं यत् वयं नूतनाधिनियमान् न पालयिष्यामः ते ताम् एव जीवन-शैलीम् अङ्गीकृतवन्तः सर्वकारेण या अवैधा इति घोषिता आसीत्। अनेकधाः तैः प्रत्यक्षतः दमनं विरुध्य विद्रोहः अपि कृतः। षडाधिकैकोन-विंशति-शत-तमवर्षे (1906) सोङ्ग्रम-संगमा-द्वारा असमे अपि च त्रिंशदधिकैकोन-विंशति-शत-तम-दशके (1930) मध्यप्रान्ते अपि अभवत् वन-सत्याग्रहाः एतादृशाः एव विद्रोहाः आसन्।

## वाणिज्यस्य समस्या

एकोनविंशति-शताब्दे जनजातीय-समूहैः अनुभूतं यत् वणिजः महाजनाः च वनानि शीघ्रतया आगच्छन्ति। ते वन्योत्पादनं क्रेतुं प्रत्यक्षर्णदातुम् आदिवासिनः च वत्तौ नियोजयितुम् आगच्छन्ति स्म एतैः सर्वैः परिवर्तनैः के प्रभावाः अथवा दुष्प्रभावाः भविष्यन्ति इति विषयम् अवगन्तुम् आदिवासिनां कृते समयः अपेक्षितः आसीत्। इदम् अवगन्तुम् आगच्छतु कौशेयोत्पादकानां स्थितिं पश्यामः। अष्टादशशताब्दे भारतीयकौशेयस्य यूरोपीयविपणिषु आधिक्येन याचना आसीत्। भारतीयकौशेयस्य उच्चगुणवत्ता सर्वान् आकर्षयति स्म, तथा च निर्यातः तीव्रतया वर्धते स्म। यथा विपण्याः विस्तारः जातः ईस्ट-इण्डिया-संस्थायाः अधिकारिणः एताम् अभ्यर्थनां पूरयितुं कौशेयस्य उत्पादनाय बलाघातम् आरब्धवन्तः।

वर्तमान-झारखण्डे स्थितस्य हाजारीबागस्य पार्श्वेस्थेषु स्थानेषु संस्थाल-समुदायस्य जनाः कौशेयकीटान् पालयन्ति स्म। कौशेयवणिजः स्वशुल्कजीविनः प्रेष्य आदिवादिभ्यः ऋणं यच्छन्ति स्म अपि च तेषां कृमिकोशानां च सङ्ग्रहणं कुर्वन्ति स्म। सहस्रं कृमिकोशानां विनिमये त्रीणि चत्वारि वा रूप्यकाणि लभ्यन्ते स्म। एतदनन्तरं ते कृमिकोशाः बर्दवान-नगरं गयानगरं च प्रेष्यन्ते स्म, तत्र ते पञ्चगुणितेन अधिमूल्येन विक्रीयन्ते स्म। निर्यातकानां कौशेयोत्पादकानां च मध्ये मध्यस्थाः जनाः आधिक्येन लाभांशं प्राप्नुवन्ति स्म। कौशेयोत्पादकाः अत्यल्पं लाभं प्राप्नुवन्ति स्म। स्वाभाविकम् अस्ति यत् अनेके आदिवासि-समुदायाः विपणिं वणिजः च स्वस्य महान् शत्रुत्वेन मन्यन्ते स्म।



कटं वयन्ती काचित् हाजांगमहिला।

महिलाः गृह्यकार्येण सह क्षेत्रेषु यन्त्रागारेषु च अपि स्वबालान् सहैव आदाय गच्छन्ति स्म। तत्र च कार्यं करोति स्म।



**चित्रम् १० -** बिहारस्य प्रस्तराङ्गार (कोयला) -खनिकाः।
विंशत्यधिकैकोन-विंशति-शत-तम-दशके (1920) बिहारस्य झरिया-रानीगंजयोः प्रस्ताराङ्गारागारेषु कार्यकर्तारः प्रायः पञ्चाशत् प्रतिशतं खनिकाः आदिवासिनः आसन् । अन्धेरी-दमघोंटू-आकारयोः गहनतायां कार्यकरणं न केवलं भयङ्करम् आसीत् अपितु शरीरस्य अपि क्षतिं करोति स्म। वस्तुतस्तु शरीरमेव तत्र समाप्तिं गच्छति स्म । विंशत्यधिकैकोन-विंशति-शत-तम-वर्षे (1920) देशस्य प्रस्तराङ्गाराकरेषु प्रत्येकं वर्षे विंशति-सहस्राधिकाः (20,000) श्रमिकाः म्रियन्ते स्म।

### कार्यस्य अन्वेषणम्

कार्यस्य अन्वेषणाय ये आदिवासिनः गृहात् दूरं गच्छन्ति स्म तेषां स्थितिः तु इतोऽपि असमीचीना आसीत् एकोनविंशति-शताब्दस्य अन्तकालादेव चायस्य उद्यानानि विस्तारं गच्छन्ति स्म । खननोद्योगः अपि कश्चित् महत्त्वपूर्णः उद्योगः जातः आसीत् । असमस्य चायस्य उद्यानेषु झारखण्डस्य च प्रस्तराङ्गाराकरेषु कार्याय आदिवासिनः व्यापकसंख्यया तत्र प्रवेशिताः अर्थात् कार्ये नियोजिताः। एते जनाः संविदानां (ठेकेदार) माध्यमेन प्रवेश्यन्ते स्म । एते संवित्जनाः न केवलम् एतेभ्यः आदिवासि-श्रमिकेभ्यः न्यूनवेतनम् एव यच्छन्ति स्म अपितु तान् गृहं प्रति गन्तुम् अपि अवसरं न यच्छन्ति स्म।

## सामीप्यात् दर्शने सति

एकोनविंशति-विंशतिशताब्दावधौ देशस्य विभिन्नेषु भागेषु जनजातीय-सङ्घैः अनेकधा परिवर्तिनाम् अभिनियमान् विविध-प्रतिबन्धान् नूतनकर-व्यवस्थां महाजनद्वारा क्रिययाणं शोषणं च अभिलक्ष्य अनेकधा विद्रोहः कृतः । एकत्रिंशदधिकाष्टादश-शत-तम-द्वात्रिंशदधिकाष्टा-दश-शत-तम-दशकयोः (1831-1832) प्रस्तराङ्गारादिवासिनः अपि च पञ्चपञ्चाशदधिकाष्टा-दश-शत-तमवर्षे (1855) संथाल-समुदायिक-जनैः विद्रोहः कृतः । मध्यभारते बस्तर-विद्रोहः दशाधिकैकोनविंशतिशत-तमवर्षे (1910) अभवत् अपि च चत्वारिंशदधिकैकोन-विंशति-शत-तम-वर्षे (1940) महाराष्ट्रेषु अपि वर्लीविद्रोहः अभवत् । बिरसावर्यः यस्य आन्दोलनस्य नेतृत्वं करोति स्म सः अपि एतादृशः एव विद्रोहः आसीत्।

**➢ गतिविधिः**

अवजानन्तु यत् प्रस्तराङ्गाराकरेषु कार्यस्वरूपं परिवर्तितम् अस्ति अथवा नैव । अवजानन्तु यत् प्रतिवर्षम् आकरेषु कति जनाः म्रियन्ते तथा च तेषां मृत्योः कानि कारणानि भवन्ति।

## बिरसा-मुण्डा

बिरसा-महोदयस्य जन्म सप्तत्यधिकाष्टा-दशशत-तमदशकस्य (1870) मध्ये अभवत्। तस्य पिता निर्धनः आसीत्। बिरसा-महोदयस्य बाल्यकालः अजमेषाणां चारणेन वेणु-वादनेन स्थानीय-मल्लभूमिषु नृत्य-गानादि-कलाभिः च व्यतीतः। तस्य पालनादिकं मुख्यरूपेण बोहोण्डाख्यस्य स्थानस्य पार्श्वस्थेषु वनेषु अभवत्। निर्धनताग्रस्तेन बिरसा-महोदयस्य पित्रा कार्यस्य अन्वेषणाय स्थाने स्थाने विचरणीयं भवति स्म। बाल्यकाले एव बिरसा अतीते जातानां मुण्डा-विद्रोहाणां कथाः अशृणोत्। बिरसामुण्डाः अनेकधा समुदायस्य प्रमुखान् विद्रोहस्य आह्वानं कुर्वतः दृष्टवान्। बिरसावर्यस्य समुदायस्य जनाः तादृशस्य स्वर्णयुगस्य विषये आलपन्ति स्म परस्परं यदा मुण्डाजनाः दीकुजनानाम् उत्पीडनात् सर्वथा मुक्ताः आसन्। प्रमुखाः कथयन्ति स्म यत् एकदा पुनः तस्य समुदायस्य परम्परागताः अधिकाराः मुक्ताः भविष्यन्ति। ते आत्मानं क्षेत्रस्य मूलनिवासिनां वंशजाः मन्यन्ते स्म तथा च स्वभूमिविषयकं युद्धं युद्ध्यन्ते स्म, ते जनान् स्मारयन्ति स्म यत् तैः स्वकीयं साम्राज्यं पुनः प्रापणीयम् अस्ति इति।

बिरसामहोदयः स्थानीय-ईसायि-धर्मप्रचारकाणां विद्यालयं गन्तुम् आरब्धवान् यत्र सः ईसायि-धर्मस्य प्रचारकाणाम् उपदेशं श्रोतुम् अवसरं प्राप्नोत्। तत्रापि सः अशृणोत् यत् मुण्डासमुदायः स्वर्गस्य साम्राज्यं प्राप्तुं शक्नोति तथा च स्वकीयं परिहृतान् अधिकारान् पुनः प्राप्तुं शक्नोति। यदि ते स्वकीयां कुप्रवृत्तिं परित्यज्य ईसायि-धर्मावलम्बिनः भवन्तु तदा एतत् सर्वं भवितुं शक्नोति। अनन्तरकाले बिरसावर्येण कस्यचित् प्रख्यातस्य वैष्णव-धर्मप्रकारकस्य सान्निध्ये अपि जीवनं यापिताम्। तेन यज्ञोपवीतं धृतम् अपि च शुद्धता-दयादिविषये च बलाघातः कृतः।

स्वस्यां किशोरावस्थायाम् एव बिरसामहोदयः यया विचार-धारया परिचितः, तया विचारधारया सह अतीव प्रभावितः। बिरसा-महोदयस्य आन्दोलनम् आदिवासि-समाजस्य संशोधनस्य परिष्कारस्य च आन्दोलनम् आसीत्। सः मुण्डासमुदायम् आहूतवान् यत् सः मदिरापानं न कुर्यात् मदिरापानं परित्यजेत्, ग्रामान् स्वच्छीकुर्वन्तु मारण-मोहनोच्चाटनादिषु विश्वासं न कुर्युः। अत्र ध्यातव्यः अंशः एषः अस्ति यत् बिरसामहोदयेन ईसायि-धर्म-प्रचारकाणां हिन्दुभूस्वामिनां च निरन्तरं विरोधः कृतः। मुण्डावर्यः एतादृशान् जनान् बाह्यान् मन्यते स्म ते मुण्डासमुदायस्य जीवनशैलीं च नाशयन्ति इति दृष्ट्या तान् सः पश्यति स्म इति।

पञ्चनवत्यधिकाष्टा-दश-शत-तमवर्षे (1895) बिरसाः स्वानुयायिनः आहूतवान् यत् ते स्वकीयं गौरवपूर्णम् अतीतं पुनर्जीवयितुं संकल्पं नयन्तु। बिरसावर्यः अतीतस्य एकस्यचित् एतादृशस्य स्वर्णयुगस्य-सतयुगस्य च चर्चां करोति स्म यदा मुण्डाजनाः सुजीवनं जीवन्ति स्म, तटबन्धान् बध्नन्ति स्म, प्राकृतिक-जल-प्रपातान् नियन्त्रयन्ति स्म, वृक्षारोपणं उद्यानानि च विकासयन्ति स्म,उदरपूर्तये कृषिं कुर्वन्ति स्म। तस्मिन् काल्पनिके युगे मुण्डाजनाः स्वज्ञातिनां रक्तरञ्जनं न कुर्वन्ति स्म। ते सत्यनिष्ठया जीवन्ति स्म जनाः एकदा पुनः स्वभूमौ एव कृषिं कुर्वन्तु, एकस्मिन् स्थाने ऐक्यभावेन स्थैर्येण च तिष्ठन्तु स्वस्वक्षेत्रेषु चैव कृषिकार्यं कुर्वन्तु इति।

आङ्ग्लीयाः बिरसान्दोलनस्य राजनैतिकोद्देश्येभ्यः बह्वधिकाः अवसादग्रस्ताः आसन्। एतस्य आन्दोलस्य उद्देश्यम् आसीत् यत् ईसायिजनान् महाजनान् हिन्दुभूस्वामिनः सर्वकारं च बहिष्कृत्य बिरसावर्यस्य नेतृत्वे मुण्डाराजस्थापितं भवेत् इति।

**रक्तरञ्जितौ मम स्कन्धौ**

मुण्डादिवासिनां गीतेषु तेषां कष्टानि दृग्गोचराणि भवन्ति।

हा! तैल-पेषकस्य वृषभस्य इव रक्तरञ्जितौ मम स्कन्धौ
भूस्वामिनः दूताः अहोरात्रं मां तुदन्ति प्रलपामि अहम् इदमेव अहोरात्रम्
हा! इयम् एव मम स्थितिः!
मम निवासस्थानं निश्चितं नास्ति किमपि,
नासि मयि काचिदपि प्रसन्नता,

के.एस.सिंहः,बिरसा-मुण्डा-एंड-हिज-मूवमेंट,पृष्ठम्-१२

**वैष्णवः**- विष्णोः उपासकः वैष्णवः इति उच्यते।

इदं मुण्डान्दोलनं ताः एव भूस्वाम्यादिशक्तीः मुण्डानां सर्वासां समस्यानां कष्टानां स्रोतोरूपेण मन्यते स्म । आङ्ग्लीयानां भूनीतयः तेषं परम्परागत-भूमिव्यवस्थां नष्टीकुर्वन्ति स्म, हिन्दूभूस्वामिनः महाजनाः च तेषां भूमीः परिहरन्ति स्म अपि च ईसायि-धर्मावलम्बिनः तेषां परम्परागतायाः संस्कृतेः आलोचनां कुर्वन्ति स्म ।

यदा आन्दोलनस्य विस्तारः आरब्धः तदा आङ्ग्लीयाः दृढस्य क्रियान्वयनस्य निर्णयम् अकुर्वन् । आङ्ग्लीयाः पञ्चनवत्यधिकाष्टा-दश-शत-तमवर्षे (1895) बिरसामहोदयं निगडितवन्तः तथा च तं विद्रोहस्य आरोपणैः द्वयोः वर्षयोः कृते निगृहीतवन्तः दण्डितवन्तः च ।

सप्तनवत्यधिकाष्टा-दश-शत-तम-वर्षे (1897) कारातः प्रत्यागमनस्य पश्चात् बिरसावर्यः जनसमर्थनं प्राप्तुं प्रतिग्रामं भ्रमितुम् आरब्धवान् । सः ग्रामजनान् उत्प्रेरयितुं परम्परागत-प्रतीकानां भाषायाः च प्रयोगम् अकरोत् । सः जनान् आह्वयति स्म यत् तस्य नेतृत्वे साम्राज्यस्य स्थापनायै "रावणान् अर्थात् (दीकूजनान् यूरोपीयजनान् च ) नाशयन्तु । बिरसावर्यस्य अनुनायिनः दीकूजनान् यूरोपीय-सत्तायाः च प्रतीकान् नाशयितुम् आरब्धवन्तः । तैः आरक्षकालयानां ईसायिमन्दिराणां च उपरि आक्रमणानि कृतानि तथा च महाजनानां भूस्वामिनां च सम्पत्तीनाम् अपि हानिम् अकुर्वन् । श्वेतवैजयन्ती बिरसाराजस्य प्रतीकभूता आसीत् ।

एकोनविंशति-शत-तमे वर्षे (1900) बिरसावर्यस्य विसूचिकया मृत्युः अभवत् तथा च तेन सञ्चालितम् आन्दोलनम् अपि निष्क्रियम् अभवत् । एतत् आन्दोलनं द्वाभ्यां दृष्टिभ्यां महत्त्वपूर्णम् आसीत् । प्रथमम्- एतेन आन्दोलनेन औपनिवेशिकसर्वकारः एतादृशान् अधिनियमान् स्थापयितुं बाध्यः कृतः येषां माध्यमेन दीकूजनाः आदिवासिनां भूमौ सरलतया आधिपत्यं न स्थापयितुं शक्नुवन्ति स्म । अपरम् - एतेन आन्दोलनेन एकदा पुनः बोधितं यत् अन्यायस्य विरोधं कर्तुम् औपनिवेशिकस्य शासनस्य विरोधे स्वकोपं प्रकटयितुम् आदिवासिनः सक्षमाः सन्ति । तैः आदिवासिभिः स्वविशिष्ट-परम्पराभिः शैलिभिः रीतिभिः च स्वसंघर्षस्य च प्रतीकैः एतत्कार्यं साधितम् ।

## अन्यत्र

**अस्मभ्यं प्रत्यक्ष-धनस्य का आवश्यकता !**

एतादृशानि बहूनि कारणानि सन्ति येषां कारणात् आदिवासिनः अन्ये सामाजिक-समूहाः च प्रायः विपण्याः कृते उत्पादनं न कर्तुम् इच्छन्ति । पापुआ-न्यू-गिनी इत्यस्य जनजातीये गीते एतस्य विषयस्य दिग्दर्शनं प्राप्यते यत् तत्रत्याः आदिवासिनः महाहट्टान् कया दृष्ट्या पश्यन्ति ।

कथयन्ति प्रत्यक्षधनं व्यर्थम् अस्ति तेन प्रयोजनं नास्ति, व्यर्थस्य अवकरस्य इव, वृष्ट्या अपि न एतत् रोद्धुं शक्यते कष्टानि जायन्ते,<br>
एतेषां सर्वकारीयानां मठाधीशानां कृते अर्थात् अधिकारिणां कृते अहं सोत्साहं कार्यं किमर्थं कुर्याम्, किमर्थम् अहं नारिकेलवृक्षम् आरोक्ष्यामि ?<br>
रोक-धन-सस्यानि (नकदी फसलें)<br>
समीचीनानि सन्ति परन्तु श्रीमन्! मां बोधयतु यदि क्रेतुं किमपि नास्ति तर्हि अहं चिन्ताम् एव किमर्थं कुर्याम् ?

कोहेन, क्लार्क एवं हासवेल,सं.,दि इकानामी आफ सब्सिस्टेंस एग्रीकल्चर (सप्तत्यधिकैकोन-विंशति-शत-तम-वर्षम् -1970) , इत्यस्मिन् उद्धृतस्य गीतस्य उपरि आधारितम् ।

## पुनः स्मरन्तु -

१. रिक्तस्थानानि पूरयन्तु -

(क) आङ्ग्लीयाः आदिवासिनः---------इति रूपेण वर्णितवन्तः ।

ख) झूमकृषौ बीजवपनस्य विधा -----इति उच्यते ।

ग) मध्यभारते ब्रिटिश-भूप्रबन्धस्य अन्तर्गतम् आदिवासिप्रमुखाः -------स्वामित्वं प्राप्तवन्तः ।

घ) असमस्य -----तथा च बिहारस्य ------इत्यस्मिन् कार्यं कर्तुम् आदिवासिनः गन्तुम् आरब्धवन्तः ।

**आगच्छन्तु, कल्पयामः**

मन्यन्ताम्, भवन्तः एकोनविंशति-शताब्दस्य वनग्राम-निवासिनः झूमकृषकाः सन्ति । भवन्तः कथिताः यत् यत्र भवन्तः उत्पन्नाः अधुना सा भूमिः भवतां नास्ति । आङ्ग्लाधिकारिभिः मिलित्वा भवन्तः तान् स्वसमस्यानां विषये ज्ञापयितुम् इच्छन्ति । भवन्तः तान् आङ्ग्लाधिकारिणः किं सूचयिष्यन्ति ?

२. उचितम् अथवा अनुचितं ज्ञापयन्तु –

क) झूम-कृषकाः भूमेः कर्षणं कुर्वन्ति बीजानि च वपन्ति ।

ख) वणिजः संस्थालेभ्यः कृषिकोषान् क्रीत्वा तान् च पञ्चगुणितेन अधिकमूल्येन विक्रीणन्ते स्म ।

(ग) बिरसा स्वानुयानिनः आहूतवान् यत् ते स्वस्य शुद्धीकरणं कुर्वन्तु इति, मद्यपानं त्यजन्तु, मारणमोहनादि ऐन्द्रजालप्रथासु न विश्वसन्तु ।

(घ) आङ्ग्लीयाः आदिवासिनां जीवनपद्धतिं रक्षयितुम् इच्छन्ति स्म ।

## आगच्छन्तु विचारयामः –

३. ब्रिटिशशासने यायावर-कृषकाणां पुरतः काः समस्याः आसन् ?

४. औपनिवेशिकस्य शासनस्य अन्तर्गतम् आदिवासि-प्रमुखाणां शक्तौ कानि परिवर्तनानि आगतानि ?

५. आदिवासिनः दीकूजनेभ्यः कैःकारणैः कुप्यन्ति स्म ?

६. बिरसावर्यस्य कल्पनायां स्वर्णयुगं कीदृशम् आसीत् ? भवतां चिन्तनानुसारम् इयं कल्पना जनेभ्यः एतावती आकर्षिका किमर्थं लगति स्म ?

## आगच्छन्तु कृत्वा पश्यामः

७. स्वीयैः अभिभावकैः मित्रैः शिक्षकैः च सह वार्तालापं कृत्वा विंशति-शताब्दस्य अन्येषाम् आदिवासि-विद्रोहि-नायकानां नामानि अवजानन्तु । तान् आधारिकृत्य तेषां कथाः स्वशब्दैः लिखन्तु ।

इति चतुर्थाध्यायः